शीले तत्कर्त्तरि च "अनुपदमन्वेष्टा" पा०। इट्पक्षे अन्वेषिताप्यत्र। उभययतः स्त्रियां ङीप्।

**अप्** स्त्री ब०व०। आप—क्विप् ह्रस्वश्च। जले। "प्रत्तं जलं द्रष्टुमलमन्तिकेऽपाम्" भट्टिः। "अद्भिरेव धारयित्वा नैत्यिकान्ते भुजिक्रियेति" स्मृतिः अग्नेरापः, अद्भ्योऽन्नमिति श्रुतिः "अपएव ससर्ज्जादौ तासु वीजमवासृजदिति" मनुः। समासान्ते अच् समासान्तः। "बह्वपानि तड़ागानि सारसाः समुपासते" इत्युद्भटः। कृतसमासान्तस्य उपसर्गद्व्यन्तःपरस्य आतईत्त्वम्। समीपं प्रेपम् द्वीपः अन्तरीपम्। अनुपूर्व्वात्तु देशे वाच्ये ऊत्। अनूपोदेशः अन्यत्र अन्वीपो-ग्राम इत्यादि। पूजार्थकसुपूर्व्वात् न अच्। स्वप्पि नगराणि। अपां विकारः मयट्। अम्मयः, वा ष्यञ्। आप्यम्। स्वार्थे चातु० ष्यञ्। आप्यं जले न०।

**अप** अव्य० न पाति पा—ड। वियोगे, विकृतौ, विपरीते, निदर्शने, आनन्दे, वर्ज्जने, चौर्य्ये च। "अप—वियोग विकृति-विपरीत-निदर्शनानन्द-वर्ज्जन-चौर्य्य-वारणेषु" इति ग०म०। वियोगे "अपयाति सत्त्वे निविशतेऽपैतीति" पा० भा०। "भीत्या रामादपासरत्"। विकृतौ, अपकृतः अपचयः' विपरीते, अपशब्दः "तएव शक्तिवैकल्यप्रमादालसतादिभिः। अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिता" इति हर्य्युक्तेः साधुशब्दानां वैपरीत्येनोच्चारणएवापशब्दत्वस्य परिभाषितत्वादस्य विपरीतशब्दत्वम्। निदर्शने निदेशे अपदिशति। आनन्दे अपहसति, वर्जने "अपपरी वर्जने" इति पा० उक्तेः कर्म्मप्रवचनीयसंज्ञा तद्योगे पञ्चमी। अप त्रिगर्त्तात् वृष्टोदेवः। चौर्य्ये अपहरति। वारणे अपवर्त्तयति "समेन केनापवर्त्त्यति" लीला०। अपकर्षे अपकर्म्म। अधः प्रदेशे, च अपाङ अपानः। अधोगतिमानित्यर्थः।

**अपकर्म्मन्** न० अपकृष्टं कर्म्म प्रा०स०। दुष्टाचरणे। अपाकरणे च "ऋणस्यानपकर्म्म चेति" दत्तस्यानपकर्म्म चेति स्मृतिः प्रा०ब०। दुष्टाचरणवति त्रि०। स्त्रियां वा डाप्।

**अपकर्त्तृ** त्रि० अप+कृ—तृच् स्त्रियां ङीप्। अपकारकारके।

**अपकर्ष** पु० अप+कृष—भावे घञ्। उचितधर्म्मापेक्षातो हीनतायां, "तत्र पृथिव्यादीनामन्योन्यानुप्रवेशकृतः सलिलभवरसोऽल्पत्कर्षापकर्षेण चेति" यथा हि वर्णानां पञ्चानामुत्कर्षापकर्षकृतेन संयोगविशेषेणेति" च सुश्रुतः "उत्कर्षञ्चापकर्षञ्च मनुष्येष्विह जन्मत इति" मनुः। "उत्कर्षापकर्षविहीनोमध्यः, सि०कौ०। स्वकर्त्तव्यकालात् पूर्व्वकालकरणे, परस्थपदानामन्वयार्थं पूर्व्वस्थले आकर्षणे आकर्षणमात्रे च। अपकृष्यते कर्म्मणि घञ्। स्वकालतः पूर्व्वं कर्त्तव्ये यथा अपकर्षसपिण्डनम्। तथा च "मुख्यं श्राद्धं मासिमासि अपर्य्याप्तावृतुं प्रति। द्वादशाहेन वा कुर्य्यादेकाहे द्वादशाथवेति" स्मृतौ मरणोत्तरं मृताहे मासि मासि कर्त्तव्यानां मृताहनिमित्तकमासिकादीनां द्वादशाहेषु एकाहेषु च कर्त्तव्यत्वोक्तेः सर्व्वापकर्षः। तथाऽपकर्षे च हेतव एकपुत्रत्वादयः। "आनन्त्यात् कुलधर्म्माणां पुंसश्चायुषः क्षयात्। अस्थितेश्च शरीरस्य द्वादशाहे प्रशस्यते इति" स्मृत्युक्ताः। तत्र पाश्चात्यानां कुलधर्म्मात् द्वादशाह एव कर्त्तव्यतायाः कुलपरम्पराचारः। वङ्गीयानान्तु एकपुत्रस्यैव आयुषःक्षयसम्भावनायामिति भेदः। अयमेव सर्वापकर्षः, आवश्यकवृद्ध्यारम्भकाले तु न सर्वापकर्षः। किन्तु पश्चाद्भाविनामेवापकर्ष इति भेदः। एवं नवममासादिष्वप्यपकर्षणे न सर्वापकर्ष इति बोध्यम्।

**अपकर्षक** त्रि० अपकर्षति अप+कृष—कर्त्तरि ण्वुल्। अपकर्षकारके "रसस्यानपकर्षकत्वे तेषां दोषत्वमपि नाङ्गीक्रियते" इति "दोषास्तस्यापकर्षकाः" इति च सा०द०।

**अपकर्षण** त्रि० अपकर्षति अपहरति कर्त्तरि ल्यु। अपहारके "नचास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणमिति" "वर्षासु बहुविण्मूत्रास्नुताः श्लेष्मापकर्षणा" इति सुश्रु० भावे ल्युट्। आकर्षणे न०। "सशल्यः क्लिश्यते प्राणैर्विशल्योविनशिष्यति। इति मामाविशश्चिन्ता तस्य शल्यापकर्षणे" रामा०।

**अपकाम** त्रि० अपगतः कामो यस्य यत्र यस्माद्वा प्रा०ब०। अपगतकामे वा उत्तरपदलोपाभावे अपगतकामोऽप्युक्तार्थे "अपकामं स्यन्दमाना अवीवरत वोहितमिति" अथ० ३१२,२,। कामस्यात्ययः अत्यये अव्ययी०। कामात्यये अव्य० "शत्रोरकामं कृणोति धन्वनेति" ऋ० ६,७५,२, "अपकामं कामस्यापायमिति" भा०।

**अपकार** पु० अप+कृ—भावे घञ्। अनिष्टसम्पादने तद्धेतौ द्रोहे च "द्रोहोऽपकार इति" सि०कौ०। "उपकर्त्त्रारिणा सन्धिर्न मित्रेणापकारिणा। उपकारापकारौ हि लक्ष्यं लक्षणमेतयोरिति" माघः। "अपकारोऽनिष्टचिन्ते" त्युक्तेरनिष्टं भयादि। चिन्तने च "ततो जातास्त्विमा घोरा नानारूपा महाविषाः अपकाराय वर्त्तन्ते इति" सुश्रुतः।

**अपकारगिर्** स्त्री अपकारेण द्वेषेण गीर्य्यते गृ—क्विप्। भर्त्सनवाक्ये। "भर्त्सनं त्वपकारगीः" इत्यमरः।

**अपकारिन्** त्रि० अप+कृ—कर्त्तरि णिनि। अपकारककारके,